শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥ শ্রীরঙ্গনাথপাদুকাসহস্রম্ ॥

## ॥ শৃঙ্গারপদ্ধতিঃ দশমী ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শৃঙ্গারপদ্ধতিঃ দশমী ॥

শ্ৰীমান্ ৱেঙ্কটনাথাৰ্যঃ কৱিতাৰ্কিককেসরী।
ৱেদান্তাচাৰ্যৱৰ্যো মে সন্নিধত্তাং সদা হৃদি॥

শৌরেঃ শৃঙ্গারচেষ্টানাং প্ৰসূতিং পাদুকাং ভজে।
যামেষ ভুঙ্কতে শুদ্ধান্তাত্ পূৰ্ৱং পশ্চাদপি প্ৰভুঃ॥ ১০-১ ॥

প্ৰণতত্ৰিদশেন্দ্ৰমৌলিমালা
মকরন্দাৰ্দ্ৰপরাগপঙ্কিলেন।
অনুলিম্পতি পাদুকে! স্ৱযং ত্ৱাম্
অনুরূপেণ পদেন রঙ্গনাথঃ॥ ১০-২ ॥

অৱদাতহিমাংশুকানুষক্তং
পদরক্ষে! ত্ৱযি রঙ্গিণঃ কদাচিত্।
কিমপি স্থিতমদ্বিতীযমাল্যং
ৱিরলাৱস্থিতমৌক্তিকং স্মরামি॥ ১০-৩ ॥

অসহাযগৃহীতরঙ্গনাথাং
অৱরোধাঙ্গণসীম্নি পাদুকে! ত্ৱাম্।
সুদৃশঃ স্ৱযম্ অৰ্চযন্তি দূরাত্
অৱতংসোতপলৱাসিতৈরপাঙ্গৈঃ॥ ১০-৪ ॥

নিৰ্ৱিশ্যমানমপি নূতনসন্নিৱেশং
কৈৱল্যকল্পিতৱিভূষণকাযকান্তিম্।
কালেষু নিৰ্ৱিশসি রঙ্গযুৱানম্ একা
শৃঙ্গারনিত্যরসিকং মণিপাদরক্ষে!॥ ১০-৫ ॥

ন্দ্ৰিাযিতস্য কমিতুৰ্মণিপাদুকে! ত্ৱং
পৰ্যঙ্কিকাপরিসরং প্ৰতিপদ্যমানা।
শ্ৱাসানিলপ্ৰচলিতেন ভজস্যমীক্ষ্ণং
নাভীসরোজরজসা নৱমঙ্গরাগম্॥ ১০-৬ ॥

শযিতৱতি রজন্যাং পাদুকে! রঙ্গবন্ধৌ
    চরণকমলপার্শ্বে সাদরং ৱর্তসে ত্বম্।
ফণিপতিশযনীযাদুত্থিতস্য প্রভাতে
    প্রথমনযনপাতং পাৱনং প্রাপ্তুকামা॥ ১০-৭ ॥

চরণকমলসঙ্গাদ্রঙ্গনাথস্য নিত্যং
    নিগমপরিমলং ত্বং পাদুকে! নির্ৱমন্তী।
নিযতমতিশযানা ৱর্তসে সাৱরোধং
    হৃদযমধিৱসন্তীং মালিকাং ৱৈজযন্তীম্॥ ১০-৮ ॥

উপনিষদবলাভির্নিত্যমুত্তংসনীযং
    কিমপি জলধিকন্যাহস্তসংৱাহনার্হম্।
তৱ তু চরণরক্ষে! দেৱি লীলারৱিন্দং
    চরণসরসিজং তচ্চারু চাণূরহন্তুঃ॥ ১০-৯ ॥

অখিলান্তঃপুরৱারেষ্ৱনেকৱারং পদাৱনি! স্বৈরম্।
অনুভৱতি রঙ্গনাথো ৱিহারৱিক্রান্তিসহচরীং ভৱতীম্॥ ১০-১০ ॥

॥ ইতি শ্রীপাদুকাসহস্রে শৃঙ্গারপদ্ধতিঃ দশমী ॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্রীমতে ৱেঙ্কটেশায ৱেদান্তগুরৱে নমঃ॥